सुत्पत्तश्च इत्युक्तम्। अग्निना उक्तः प्रजापतिरिदमग्निहोत्रगतं हविस्तुभ्यमेव हूयाता इति भागं दत्तवान्। ततोऽग्निहोत्रहविःस्वरूपं भागधेयमभिलक्ष्याग्निरुत्पन्नः। तस्मादग्नये होत्रं होमोऽस्मिन् कर्म्मणीति बहुव्रीहिव्युत्पत्त्या अग्निहोत्रमिति कर्म्मनाम। अग्नये होत्रमिति तत्पुरुषव्युत्पत्त्या हविर्नाम" इति तद्भाष्यम्। तत्कालश्च तत्रैवोक्तः "तद्धूयमानमादित्योऽब्रवीत्। मा हौषीः। उभयोर्वै नावेतदिति सोऽग्निरब्रवीत्। कथं नौ होष्यन्तीति। सायमेव तुभ्यं जुह्वन् प्रातर्मह्यमित्यब्रवीत्। तस्मादग्नये सायं हूयते सूर्य्याय प्रातः" इति। तद्धविरग्न्यर्थं प्रजापतिना हूयमानं दृष्ट्वा मा हौषीरित्येवमादित्यो निवारयामास। हेतुञ्चैवमवोचत्। योऽयमग्निर्यश्चाहं तयोरुभयोरावयोरेतद्धविः, न त्वेकस्याग्नेः इति। तदानीमुभयोर्भागव्यवस्था जाता। अग्निना पृष्टा या कालभेदेन व्यवस्था तामुवाच। तस्मादग्नये सायं जुहुयात्, सूर्य्याय प्रातर्जुहुयात्" इति तद्भाष्यम्।

तच्च नित्यं काम्यञ्च "यावज्जीवमग्निहोत्रं जुहोतीति" श्रुत्या नित्यस्य "उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोतीति" श्रुत्या च काम्यस्य विधानमुक्तम्। अस्य यजुर्वेदोक्तत्वेऽपि सर्व्ववेदिभिः कर्त्तव्यता "यन्नाम्नातं स्वशाखायां पारक्यमविरोधि च विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादि कर्म्मवदिति" छन्दोग०प० कात्या०। "अग्निहोत्रं त्रयोवेदास्त्रिदण्डो भस्मधारणम्। बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिरिति" चार्व्वाकमतम्।

**अग्निहोत्रहवनी** स्त्री अग्निहोत्रोऽग्निः हविर्वा हूयतेऽनया हु-करणे ल्युट् ६त०। अग्निहोत्रहविर्ग्रहण्यां स्रुचि।

**अग्निहोत्रहुत्** पु० अग्निहोत्रमग्निं जुहोति हु-क्विप् ६त०। कृताग्निहोत्रे "यत्र सुहृदा सुकृतामग्निहोत्रहुतां यत्र लोक" इति, श्रुतिः।

**अग्निहोत्रिन्** पु० अग्निहोत्र+मत्वर्थे इनि। अग्निस्थापनपूर्ब्बकं प्रातरादिकाले अग्निहोत्रहोमकर्त्तरि साग्निके।

**अग्नीध्** पु० इध्यते इन्ध-भावे क्विप् ६त०। अग्न्युद्दीपने "अग्नीधः शरणे रण् भञ्चेति" कात्या० वा०। शरणार्थे रणि आग्नीध्रः। कर्त्तरि क्विप्। अग्न्याधानकर्त्तरि।

**अग्नीध्र** पु० अग्निम् आदधाति धृ-क दीर्घः। वह्न्याधानकारके ब्रह्मापरपर्य्याये ऋत्विग्भेदे। अग्निं धारयत्यस्मै सम्प्रदाने घञर्थे क दीर्घः। अग्निकृत्ये होमादौ पु०।

**अग्नीन्द्र** पु० द्वि० द्वन्द्व० इन्द्रपरत्वान्नात्। एतन्नामकयोरेकहविर्भोक्त्रोर्देवयोः।

**अग्नीन्धन** त्रि० अग्निरिध्यतेऽनेन इन्ध-ल्युट् ६त०। मन्त्रभेदे। स्त्रियां टित्त्वात् ङीप्। भावे ल्युटि। अग्निकृत्ये न०। [सन्निकृष्टस्थाने।

**अग्नीय** त्रि० अग्नेरदूरभवं स्थानादि-उत्करा० छ। वह्नि-

**अग्नीवरुण** पु० द्वि० द्वन्द्व० ईत्। एतयोरेकहविर्भोक्त्रोर्देवयोः।

**अग्नीषोम** पु० द्वि० द्वन्द्व० ईत् षत्वञ्च। एतन्नामकयोरेकहविर्भोक्त्रोर्देवयोः। "अग्नीषोमीयं पशुमालभेतेति" श्रुतिः।

**अग्नीषोमप्रणयनी** स्त्री अग्नीषोमौ प्रणीयेते संस्क्रियेते अनया अत्र वा प्र+नी-करणे आधारे वा ल्युट् ङीप्। तयोः संस्कारिकायामृचि पात्रयाञ्च। भावे ल्युट्। तयोः संस्कारे न०।

**अग्नीषोमीय** त्रि० अग्नीषोमौ देवते अस्य छ। तद्देवताके पश्वादौ कपालरूपपात्रादिसंस्कृते हविर्भेदे च "अग्निषोमीयमेकादशकपालं निर्व्वपतीति" "योऽग्नीषोमीयस्य पशोरश्नातीति" च श्रुतिः।

**अग्न्यगार** न० अग्नेः अग्निहोत्रसंबन्धिवह्नेरगारं ६त०। अग्निहोत्रगृहे "वसंश्चतुर्थोऽग्निरिवाग्न्यगारे" इति रघुः। अग्निगृहादयोऽप्यत्र।

**अग्न्याधान** न० अग्नेराधानम् आ-धाञ्-ल्युट् ६त०। वेदमन्त्रद्वारा वह्निस्थापने। ७बहु०। अग्निहोत्रयागे।

**अग्न्याधेय** पु० अग्निराधेयो येन। अग्निहोत्रिणि साग्निके द्विजे तत्प्रकारश्च "पुण्यमेवादधीताग्निमित्युपक्रम्य कात्यायनसंहितायां दर्शितः कल्पग्रन्थे च विस्तरो द्रष्टव्यः।

**अग्न्यालय** पु० अग्नेरालयः आ+ली-आधारे अच् ६त०। वेदमन्त्रद्वारा वह्निस्थापनयोग्ये गृहे, तदाधारे-कुण्डे, स्थण्डिले च।

**अग्न्याहित** पु० अग्निराहितो येन आ+धाञ्-कर्म्मणि क्त, वा परनिपातः। अग्निहोत्रिणि साग्निके द्विजे।

**अग्न्युत्पात** पु० अग्निना दिव्यानलेन कृत उत्पातः (अनिष्टसूचकोपद्रवः) उद्+पत-घञ् ३त०। आकाशस्थानलविकारसूचितोपद्रवे, उल्कापातादावशुभसूचके, धूमकेतुकृतविकारे च। स च नाभस उत्पातः उल्कादिरूपः पञ्चविधः धिष्ण्योल्काशनिविद्युत्ताराभेदात्। तेषां लक्षणादिकं फलसहितम् बृहत्संहितायामुक्तं ३३ अ० यथा "दिवि भुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः।